ORIGINAL RESEARCH PAPER

Sanskrit

# सत्सङ्गत्या परोपकारसिद्धिः

KEY WORDS:

**Dr. C. Venkatesan**

M.A., M.Phil., Ph.D, Asst. Prof., The Rajah's College of Sanskrit and Tamil Studies, Thiruvaiyaru, Thanjavur - 613204

मनुष्यः सामाजिकः प्राणी, न कोऽपि एकाकी स्थातुमभिलषति शक्नोति वा। अयं प्राणिना सहजस्वभावो यत् ते सङ्गमिच्छन्ति। सङ्गतिरेषा द्विविधा भवति-सत्सङ्गतिः कुसङ्गतिश्च। सतां सज्जनानां सम्पर्कः सङ्गो वा सत्सङ्गतिरित्यभिधीयते। एतद्विपरीतं दुर्जनानां संसर्ग एव कुसङ्गतिरित्युच्यते। जीवनस्योन्नत्यै सफलतायै च सत्सङ्गतिरतीव महत्त्वपूर्णा।

अनुकरणशीलता मानवस्य सहजा प्रवृत्तिः। तस्योपरि सङ्गतेर्महान् प्रभावः भवति, अतो यादृशीं सङ्गतिं सः कुरुते तादृश एव स जायते इति जानन्त्येव जनाः। सङ्गतेरयं प्रभावः सर्वास्वेवावस्थासु दृश्यते। बाल्यावस्थायां विशेषतो बालकेषु सङ्गतेरयं प्रभावः शीघ्रं भवति। स्वसमीपवर्तिनामनुकरणं ते बाल्यादेव कुर्वन्ति। तत एव ते समुन्नतिमवनतिं, गुणशालित्वं दुर्गुणनिवासत्वं वा सम्प्राप्नुवन्ति (भजन्ति)। तदाधारेण च समाजे तस्य प्रतिष्ठाऽप्रतिष्ठा, कीर्तिरपकीर्तिः, समादरणीयता, वचनीयता वा जायते।

सज्जनानां सङ्गत्या निर्गुणोऽपि सगुणः क्रूरोऽपि सहृदयः, अधर्मात्मापि धर्मशीलः, पापावृत्तचेता अपि पुण्यकर्मनिष्ठः, अज्ञानावृतलोचनोऽपि ज्ञानप्राप्तप्रदीप्तः, सकलङ्कोऽपि निष्कलङ्कः सञ्जायते। मानवः शिष्टो विनीतश्च भवति सत्सङ्गतेः प्रभावेण, अतः सत्सङ्गतिरेव सेव्या न तु कुसङ्गतिः। सत्सङ्गतिर्महती, प्रभावकारिणी। सत्सङ्गकारणात् साधारणोऽपि प्राणी महिमावान् भवितुं प्रभवति. एषा मानवस्य दुर्गुणान् दूरीकृत्य तं हिताय संयुङ्क्ते, मातेव तं रक्षति, कान्तेव खेदमपाकरोति, सकलमपि दुःसाध्यं साध्यं विदधाति सत्सङ्गतिः। उच्यतेऽपि ---

"जाड्यं धियो हरति सिञ्चति वाचि सत्यम्,
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिम्,
सत्सङ्गतिः कथय किं न करोति पुंसाम्॥"

आदिकविवाल्मीकिना महर्षेर्नारदस्य सङ्गत्यैव दिव्यं चक्षुः प्रतिलभ्य रामायणं रचयित्वा महर्षिपदवीम् आदिकविपदञ्च सम्प्राप्तम्। पितृविहीनेन लौकिकव्यवहारानभिज्ञेन चन्द्रगुप्तेनापि चाणक्यस्य सङ्गादेव साम्राज्यप्रभुत्वञ्च अधिगतम्। शौण्डिकीहस्ते पयोऽपि मदिरा मन्यते। पद्मपत्रस्थितं वारि मौक्तिकमिवाभाति। मलयाचलस्थचन्दनगन्धेन इन्धनमपि चन्दनायते। एतानि विविधानि उदाहरणानि सर्वेष्वेव क्षेत्रेषु कालेषु च दृश्यन्ते। उक्तमपि –
"काचः काञ्चनसंसर्गात् धत्ते मारकतीं द्युतिम्।"

अत एव नीतिकारैर्वारं वारमेतदुक्तम्-
"सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम्॥"
यथा कीटः सुमनःसङ्गात् सतां शिर आरोहति, महद्भिः सुप्रतिष्ठितोऽश्मापि देवत्वं याति, तद्वत् सत्सङ्गत्या दुर्जनोऽपि सज्जनवत् सम्मान्यते, मूर्खोऽपि विदुषा सह पात्रतां याति। यथाभिधीयते—
"महाजनस्य संसर्गः कस्य नोन्नतिकारकः।
पद्मपत्रस्थितं वारि धत्ते मुक्ताफलश्रियम्॥"

अपि च-
"संसर्गजा दोषगुणाः भवन्ति।"
यथा सर्वैर्ज्ञायते यत् सत्सङ्गतेर्बहवो लाभा वर्तन्ते तथापि सत्सङ्गतिरियं सुदुर्लभा। इयमनेकजन्मार्जितपुण्यैरेव लब्धुं शक्या। उक्तं हि यथा-
"गङ्गेवाघविनाशिनी जनमनः सन्तोषसच्चन्द्रिका
तीक्ष्णांशोरपि सत्प्रभेव जगदज्ञानान्धकारापहा।
छायेवाखिलतापनाशनकरी स्वर्धेनुवत् कामदा
पुण्यैरेव हि लभ्यते सुकृतिभिः सत्सङ्गतिर्दुर्लभा॥"

सत्सङ्गतिर्यथा शान्तिं तनुते न तथा शीतकरः सुधांशुरपि। तीर्था दूरस्थाः सन्तश्चापि दूरस्थाः सन्तः सद्यफलप्रदाः; अतः सतां दर्शनमपि सकलमिष्टं जनयति। यद्यपि चन्दनं चन्द्रश्च द्वयमपि शीतलतां प्रयच्छतः किन्तु द्वयमप्यतिशय्य साधुसङ्गतिरपूर्वमेव सौख्यं मनःशान्तिञ्च प्रयच्छति, उच्यते यथा --
"चन्दनं शीतलं लोके चन्दनादपि चन्द्रमाः।
चन्द्रचन्दनयोर्मध्ये शीतला साधुसङ्गतिः॥"

एकमेव वस्त्रं यदा राष्ट्रध्वजरूपेण सम्मानितं भवति तदा असङ्ख्यसैनिकाः तत् रक्षणार्थं स्वप्राणानपि त्यजन्ति। वरिष्ठा नेतारो महीयांसो विद्वांसोऽपि तत्सम्मानयन्तः कुसुमाञ्जलिं समर्पयन्ति, श्रद्धया नतशिरसो जायन्ते किन्तु तादृशमेवान्यत् वस्त्रखण्डं शवसंसर्गेण सर्वजनपरिहरणीयतामेति। एवं यथा सत्सङ्गतेरनेके लाभाः सन्ति; तथैव कुसंगादनेका हानयोऽपि जायन्ते। कुसंगत्या सर्वप्रथमं मानहानिर्भवति। मानवस्य सर्वे गुणा नश्यन्ति, बुद्धिः क्षीयते, सदसद्विवेकशक्तिर्विनश्यति, नरो दुर्व्यसनग्रस्तो जायते, तस्य शरीरं क्षीणं दुर्बलञ्च भवति, सर्वत्रानादरो भवति तस्य। शोभनमेवोक्तम्—
"यदि सत्संगनिरतो भविष्यसि भविष्यसि।
अथ दुर्जनसंसर्गे पतिष्यसि पतिष्यसि॥"
अत एवास्माभिः सुखस्य शान्तेश्च प्राप्तये, यशोज्ञानवृद्धये, आत्मकल्याणाय च सत्सङ्गतिरेव सेव्या, कुसंगतिश्च परिहरणीया।

साधवस्तु स्वर्गसुखादपि सत्संगसुखं श्रेष्ठं गणयन्ति। अतः –
"वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह।
न दुष्टजनसंसर्गः सुरेन्द्रभवनेष्वपि॥"
दुर्जनसंसर्गस्तु न कदापि सेवनीय इत्यस्मिन् विषये महाकवेर्भारवेरपि विचाराः समादरणीयाः-
"समुन्नयन् भूतिमनार्यसङ्गमाद्वरं विरोधोऽपि समं महात्मभिः॥"

अनार्यसङ्गमात् महापुरुषैः समं विरोधोऽपि श्रेयस्करः,महाकविभारवेः मतमिदम्। किन्तु महता पुण्येनैव सत्सङ्गोऽवाप्यते नात्र विद्यते कस्यापि विप्रतिपत्तिः। एवं सत्सङ्गतेर्महत्त्वं नैव शक्यं वाचा वर्णयितुम्। यदि सत्सङ्गतिः स्यात् तर्हि परोपकारत्वमायाति सद्यः कश्चन श्लोकदृष्ट्यावलोकयामस्तावदिदानीम्-
परोपकारः
"अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय पापाय परपीडनम्॥"

महर्षेर्व्यासस्य विषये वचनमेतत् समीचीनमेव यत् परोपकारः पुण्यं प्रयच्छति, परपीडनञ्च पापकरमेव भवति। मनसा, वाचा, कर्मणा च निःस्वार्थभावनया परेषामुपकार एव परोपकार उच्यते। अन्यस्य जनस्य हिताय यत्कार्यं चिन्तनं वा, तदेव परोपकारोऽभिधीयते।

संसारेऽस्मिन् प्राणिनोऽधिकांशतः स्वार्थे एव रता दृश्यन्ते किंतु यदि सर्वोऽपि लोकः स्वार्थभावनया प्रेरितः स्यात् तर्हि कथमपि सामाजिकी राष्ट्रिया वा समुन्नतिर्नसंभाव्यते। स्वार्थं परित्यज्य केचित् जनाः स्वजीवनं परदुःखनिवारणेन, लोकोपकृतिसाधनेनैव यापयन्ति तेषामेव जीवनं यथार्थतः सफलम्। परोपकारसदृशगुणनिधयो यत्र शोभन्ते तत्रैव महापुरुषपदवाच्यता विराजते। मनसा, वचसा, कर्मणा च जनानां कल्याणं विदधतां परगुणानां गौरवं दर्शयतां महापुरुषाणां सज्जनानां दुर्लभता नीतिकारेण श्रीभर्तृहरिणा सुशोभनमेव दर्शिता –
"मनसि वचसि काये पुण्यपीयूषपूर्णाः
त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः।
परगुणपरमाणून् पर्वतीकृत्य नित्यं
विजहृदि विकसन्तः सन्ति सन्तः कियन्तः॥"

विरला एव सन्ति एतादृशा महापुरुषा येषां हृदयं परदुःखेन द्रवितं भवति, स्वयं क्लेशानि सहमानोऽपि परोपकारी नरः परेषामावश्यकतां पूरयति। स परेषां क्लेशानि अपाकर्तुं प्रयतते। परोपकरणे न स स्वीयं दुःखं गणयति अपितु सन्तोषमेवानुभवति, यशोभाग्भवति च, उक्तं हि यथा ---
"श्रोत्रं श्रुतेनैव न कुण्डलेन, दानेन पाणिर्न तु कङ्कणेन।
विभाति कायः करुणापराणां, परोपकारेण न चन्दनेन॥"

परोरकारिण उदारचरिता भवन्ति । परोपकारेण हृदयं पवित्रं, विशालं सरलं, विनम्र सत्त्वगुणसम्पन्नञ्च भवति। परोपकारं कृत्वा नरोऽतिशयमानन्दमनुभवति। भारतवर्षेऽनेके परोपकारिणो महापुरुषा जाता येषां नामानि भारतवर्षस्येतिहासे स्वर्णाक्षरेषु अंकितानि सन्ति। महर्षिर्दधीचिर्देवानामुपकाराय स्वास्थीन्यपि प्रादात् एवमेव दयालुर्महाराजः शिविः स्वमांसमप्युत्कृत्य श्येनाय प्रायच्छत् । महर्षिर्दयानन्दो, महात्मगान्धिनेतृवरः सुभाषचन्द्रवसुः, चन्द्रशेखर आजादभगतसिंहप्रभृतयो महापुरुषा भारतभूमिहिताय स्वप्राणान् समर्पयन् किन्तु यशः कायेन तेऽद्यापि जीविता एव । परोपकारार्थं स्वीयं सर्वस्वं तृणवत् संत्यजन्ति परोपकाररसरसिका महात्मानः। तेषामयं सुस्थिरो विश्वासो भवति यत्–

"धनानि जीवितं चैव परार्थे प्राज्ञः उत्सृजेत्।
सन्निमित्ते वरं त्यागो विनाशे नियते सति॥"

परोपकारार्थमेव परतन्त्रां स्वमातृभूमिं स्वतन्त्रां विलोकयितुं लोकमान्यबालगंगा धरतिलकप्रभृतिभिरनेकैर्मान्यैर्नेतृभिः स्वपरिवारादिकं परित्यज्य मातृभूमिसेवायां जीवनानि समर्पितानि । परोपकारस्योदात्तभावनयैव शरीरस्य शोभा वर्धते । समृद्धिभिस्ते उद्धता न भवन्ति।

संसारे अचेतना अपि परोपकाररता दृश्यन्ते तर्हि मानुषेषु तु एषा परोपकारिणी प्रवृत्तिः अवश्यमेव भवितव्या । सूर्यचन्द्रनक्षत्रादयः परोपकारार्थमेव तपन्ति, ज्योतिर्ज्योत्स्नाञ्च वितरन्ति। स्वयं स्वफलानि न भुञ्जते तरवोऽपितु तैरन्येषां क्षुधामपहरन्ति। एवं सर्वत्रैव प्रकृतौ परोपकरणं संलक्ष्यते तर्हि मानवानां प्रवृत्तिः परोपकरणे कथं न स्यात्? उक्तं हि ---

"पिवन्ति नद्यः स्वयमेव नाम्भः
स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति शस्यं खलु वारिवाहाः
परोपकाराय सतां विभूतयः॥"

सन्ति एतादृशा क्षुद्रा अपि जनाः संसारे ये धनादेः संप्राप्तौ शिरोऽभिमानेन समुन्नतं कृत्वा जनानन्यान् न गणयन्तः प्रवर्तन्ते किन्तु सज्जनास्तु समृद्धिभिः अधिकविनम्रा जायन्ते समृद्धिभिः ते उद्धता न भवन्ति । तेषां धनसम्पत्तिस्तु परोपकृत्यर्थमेव भवति । फलागमे शाखिनोऽपि नम्रत्वं दधति, उक्तं यथा-

"भवन्ति नम्रास्तरवः फलोद्गमैः
नवाम्बुभिर्दूरावलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिःस्वभाव एवैष परोपकारिणाम्॥"

एवं दुर्लभमिदं मानववपुः प्राप्यापि ये परोपकारं न कुर्वन्ति ते तु पापमेव लभन्ते। अत एव वेदे उच्यते –

'केवलाघो भवति केवलादी' इति।

अयमेव भावः श्रीकृष्णेन भगवद्गीतायामेवं वर्णितः ---

'भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्।' इति

वस्तुतः परोपकारपरायणा एव देवपुरुषा नान्ये, यथा भर्तृहरिणापि प्रोक्तम्-

"एके सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये,
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये।
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये,
ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे॥"

फलतः परोपकारो हि न केवलं परमो धर्मो मानवानामपितु लोकसंग्रहरूपेण मुक्तिसोपानमिदमिति।

एवं विश्वस्मिन् जगति सर्वैरपि महापुरुषैः परोपकारस्य महिमा स्वीकृतः । निष्कर्षरूपेण परोपकारेण यज्ञसहस्रस्य फलं लभ्यते । परोपकारं विना मनुष्यस्य जीवनं सुखपूर्णं शान्तिपूर्णञ्च न भवति। अतः सर्वैरेव मानवैर्धनैः साधनैः प्राणैरपि च परोपकारोऽवश्यमेव कर्तव्यः।